


# ❀❀❀ संस्कृतसुधा ❀❀❀

*सिद्धाचल-संस्कृतप्रेमिणां मासिक-वार्तापत्रम्*

*जुलै २०२६*

## प्रार्थना🙏

**गुरुर्ब्रह्मा गुरुर्विष्णुः**
**गुरुर्देवो महेश्वरः।**
**गुरुः साक्षात् परं ब्रह्म**
**तस्मै श्री गुरवे नमः॥**

## सम्पादकीयम्✍️

नमः सर्वेभ्यः🙏

संस्कृतस्य अध्ययनं आनन्ददायकं भवतु इति कामनया एषा **"संस्कृतसुधा मासिकपत्रिका"** सज्जीक्रियते। अस्याम् कथा, शब्दक्रीडा, सुभाषितानि, भाषाभ्यासः च समाविष्टाः सन्ति। अस्याः प्रेरणायाः मूलं अस्माकं आदरणीयः **श्री सतीश कामत् महोदयः।** तस्मै हृदयपूर्वकं कृतज्ञतां निवेदयामः। सर्वेषां सहभागः, सुझावाः, प्रोत्साहनं च सादरम् आमन्त्र्यन्ते।

*Editorial*

*It is with great joy that we present the inaugural issue of **"Sanskritasudha".** Our aim is to make the learning of Sanskrit enjoyable, meaningful, and inspiring through stories, word games, subhāṣitas, grammar exercises, and other engaging activities.*

*This newsletter has been inspired by the guidance and encouragement of our **respected teacher, Shri Sateesh Kamath Sir.** We express our heartfelt gratitude to him for motivating us to continue our Sanskrit learning journey.*

*We warmly welcome your participation, suggestions, and encouragement as we learn and grow together.*

## सुविचारः

***उद्यमेन हि सिध्यन्ति***
***कार्याणि न मनोरथैः।***
***न हि सुप्तस्य सिंहस्य***
***प्रविशन्ति मुखे मृगाः॥***

अस्य श्लोकस्य भावः अस्ति यत् संसारे किमपि कार्यं केवलं चिन्तनेन (इच्छया) पूर्णं न भवति, अपितु परिश्रमेण एव सिध्यति।

यथा महाबलवान् सिंहः अपि यदि केवलं शयनं करोति, तर्हि पशवः स्वयं तस्य मुखे न प्रविशन्ति। भोजनार्थं तेनापि प्रयत्नः करणीयः भवति।

***अतः मनुष्येण आलस्यं त्यक्त्वा स्वलक्ष्यं प्राप्तुं सर्वदा उद्योगः (परिश्रमः) करणीयः।***

,

**संस्कृतभाषा :भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती**

*English Meaning:*

*Any work is accomplished only through hard work and effort, not by mere wishing or dreaming.*

*Just as prey (like a deer) does not automatically enter the mouth of a sleeping lion; the lion too must hunt.*

*Therefore, leaving laziness aside, one must always put in effort to achieve their goal.*

**ऋतु-विशेषःवर्षाकालः**

वर्षाकालः रमणीयः भवति।

आकाशे मेघाः सन्ति।

वृष्टिः पतति।

नद्यः जलपूर्णाः भवन्ति।

वृक्षाः हरिताः भवन्ति।

मयूराः नृत्यन्ति।

कृषकाः हृष्टाः भवन्ति।

वर्षाकालः सर्वेषां हृदयानि आनन्दयति।

पञ्च उपयोगिनः शब्दाः (वर्षाकालः)

वृष्टिः – *Rainfall*

मेघः— *Cloud*

विद्युत्— *Lightning*

गर्जनम्— *Thunder*

छत्रम्— *Umbrella*

**व्याकरणाभ्यासःरिक्तस्थानं पूरयत— (माला-शब्दः)**

१.बालिका_____ धारयति। (द्वितीया एकवचनम्)

२. बालिका______शोभते। (तृतीया एकवचनम्)

३. सा_____ पुष्पाणि ददाति। (चतुर्थी एकवचनम्)

४. बालिकाः__ देवं पूजयन्ति। (तृतीया बहुवचनम्)

५. सुगन्धः_____ आगच्छति। (पञ्चमी बहुवचनम्)

उत्तराणि— अग्रिमाङ्के

## पठनस्य महत्त्वम्

ह्यः सायंकाले अहं विपणिं गतवती। आवश्यकानि वस्तूनि क्रीत्वा मूल्यदानार्थं पङ्क्तौ अतिष्ठम्।

तस्मिन् समये मम हस्तात् ₹५०० मूल्यस्य मुद्रा भूमौ अपतत्।

अग्रे स्थितः नीलवस्त्रधारी खल्वाटः पुरुषः तां मुद्रां गृहीतवान्।अहं हस्तं प्रसार्य उक्तवती– "कृपया मम मुद्रां देहि।"

सः अवदत्– "भूमौ पतितं वस्तु यः गृह्णाति तत् तस्य एव भवति। "इति उक्त्वा सः अग्रे अगच्छत्। अहं विस्मिता अभवम्। समीपे स्थिताः जनाः अपि आश्चर्येण पश्यन्तः आसन्।

अहं तस्य पृष्ठतः अगच्छम्। सः स्ववाहनस्य समीपे आगत्य हस्तस्थिते द्वौ क्रयकोशौ भूमौ स्थापितवान्।

तदा अहं तौ कोशौ गृहीत्वा अवदम्–

"भूमौ पतितं वस्तु यः गृह्णाति तत् तस्य एव भवति। "ततः शीघ्रं धावितवती। जनाः हास्येन ताडितवन्तः। सः पुरुषः अतीव क्रुद्धः अभवत्।

गृहम् आगत्य यदा कोशौ उद्घाटितवती तदा तत्र बहूनि खाद्यपदार्थानि आसन्। अहं अहसम्। किं मया कृतं सम्यक् आसीत्? उत न?

*न, एषा कथा सत्यं नास्ति। एतत् केवलं पठनस्य प्रोत्साहनार्थं लिखितम्।*

***पठनं ज्ञानं वर्धयति। कल्पनाशक्तिं विकासयति। भाषाकौशलं संवर्धयति। मनः प्रसन्नं करोति। अतः प्रतिदिनं किञ्चित् पठामः, अन्यान् अपि पठनाय प्रेरयामः।***

***पठामः। ज्ञायामः। आनन्देन जीवामः।***

## 🌺 गीतामृतम् 🌺

***श्रीमद्भगवद्गीता – भूमिका (Introduction)***

**भगवद्गीता महाभारतस्य भीष्मपर्वणि स्थितः श्रीकृष्ण-अर्जुनयोः दिव्यः संवादः अस्ति। अस्यां अष्टादश अध्यायाः, सप्तशतश्लोकाः च सन्ति। सा धर्मं, कर्मयोगं, भक्तिं, ज्ञानं तथा मोक्षमार्गं प्रदर्शयति।**

*The Bhagavad Gita is the divine dialogue between Lord Krishna and Arjuna, found in the Bhishma Parva of the Mahabharata.*

***It consists of 18 chapters and 700 verses.***

***It teaches righteousness, selfless action, devotion, knowledge, and the path to liberation.***

**अध्यायः १ – अर्जुनविषादयोगः**

भगवद्गीतायाः प्रथमः अध्यायः **'अर्जुनविषादयोगः'** इति प्रसिद्धः। अयं अध्यायः कुरुक्षेत्रस्य रणभूमेः परिचयं ददाति। अस्मिन् उभयसेनयोः समागमः, शङ्खनादः, तथा स्वबान्धवान्, गुरून्, मित्राणि च दृष्ट्वा अर्जुनस्य गम्भीरः विषादः वर्ण्यते। सः युद्धं कर्तुं न इच्छति। एषः विषादः श्रीकृष्णस्य दिव्योपदेशस्य आरम्भः अभवत्।

***Chapter 1 of the Bhagavad Gita, titled Arjuna Vishada Yoga (The Yoga of Arjuna's Despair), introduces the battlefield of Kurukshetra. It describes the gathering of the opposing armies and the sounding of the conch shells. Overcome with grief on seeing his own relatives, teachers, and friends, Arjuna refuses to fight. His despair becomes the starting point for Lord Krishna's divine teachings.***

**मुख्यश्लोकः (Key Verse)**

> ***दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ।***
> ***सीदन्ति मम गात्राणि मुखं च परिशुष्यति ॥(1.28–29)***
>
> *"O Krishna, seeing my own people assembled here for battle, my limbs fail, and my mouth becomes dry."*

**जीवनसन्देशः (Life Lesson)**

***यदा मनः भ्रमति, तदा सद्गुरोः मार्गदर्शनम् आवश्यकम्।***

***When the mind is confused, the guidance of a wise teacher leads us to the right path.***

## 🩺 आरोग्यम्

***भोजनान्ते पिबेत् तक्रं दिनान्ते च पिबेत् पयः। निशान्ते च पिबेत् वारि किं वैद्येन प्रयोजनम्॥***

**भोजनानन्तरं तक्रं, रात्रौ पयः, प्रातःकाले जलं च पिबेत्। एतेषां स्वास्थ्यकराणां आचाराणां पालनात् आरोग्यं वर्धते, वैद्यस्य आवश्यकता अपि न्यूना भवति।**